# Shri Sarveshvara Prapatti Stotram

# श्रीसर्वेश्वरप्रपत्तिस्तोत्रम्

## Document Information

Text title : Shri Sarveshvara Prapatti Stotram

File name : sarveshvaraprapattistotram.itx

Category : vishhnu, nimbArkAchArya, krishna, prapatti

Location : doc_vishhnu

Author : shrIjI

Proofread by : Mohan Chettoor

Latest update : January 7, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2023

*sanskritdocuments.org*

# श्रीसर्वेश्वरप्रपत्तिस्तोत्रम्

कृष्णं सर्वेश्वरं देवमस्माकं कुलदैवतम् ।
मनसा शिरसा वाचा प्रणमामि मुहुर्मुहुः ॥ १॥

कारुण्यसिन्धुं स्वजनैकबन्धुं
कैशोरवेषं कमनीयकेशम् ।
कालिन्दिकूले कृतरासगोष्ठिं
सर्वेश्वरं तं शरणं प्रपद्ये ॥ २॥

वेदैकगम्यं भुवनैकरम्यं
विश्वस्य जन्मस्थितिभङ्गहेतुम् ।
सर्वाधिवासं न परप्रकाशं
सर्वेश्वरं तं शरणं प्रपद्ये ॥ ३॥

राधाकलत्रं मनसापरत्रं
हेयास्पृशं दिव्यगुणैकभूमिं
पद्माकरालालितपादपद्मं
सर्वेश्वरं तं शरणं प्रपद्ये ॥ ४॥

आभीरदारानयनाब्जकोषैः
संवर्चितास्यं निखिलैरुपास्यम् ।
गोगोपगोपीभिरलङ्कृताङ्घ्रिं
सर्वेश्वरं तं शरणं प्रपद्ये ॥ ५॥

गोपालबालं सुरराजपालं
रामाङ्कमालं शतपत्रमालम् ।
वाद्यरसालं विरजं विशालं
सर्वेश्वरं तं शरणं प्रपद्ये ॥ ६॥

आनन्दसारं हृतभूमिभारं

कंशान्तकारं ह्यपिनिर्विकारं
कन्दर्पदर्पापहरावतारं
सर्वेश्वरं तं शरणं प्रपद्ये ॥ ७॥

विश्वात्मकं विश्वजनाभिरामं
ब्रह्मेन्द्ररुद्रैर्मनसा दुरापम् ।
भिन्नं ह्यभिन्नं जगतोहि यस्मात्
सर्वेश्वरं तं शरणं प्रपद्ये ॥ ८॥

पीतांशुकं चारुविचित्रवेशं
स्निग्धालकं कञ्जविशालनेत्रम् ।
गोरोचनालं कृतभालनेत्रं
सर्वेश्वरं तं शरणं प्रपद्ये ॥ ९॥

वन्यैर्विचित्रैः कृतमौलिभूषणं
मुक्ताफलाढ्यं झषराजकुण्डलम् ।
हेमाङ्गदं हारकिरीटकौस्तुभं
मेघाभमानन्दमयं मनोहरम् ॥ १०॥

सर्वेश्वरं सकललोकललाममाद्यं
देवं वरेण्यमनिशं स्वगतैर्दु रापम् ।
वृन्दावनान्तर्गतैर्मृगपक्षिभृङ्गै-
रीक्षापथागतमहं शरणं प्रपद्ये ॥ ११॥

हे सर्वज्ञ ! ऋतज्ञ ! सर्वशरण ! स्वानन्यरक्षापर !
कारुण्याकर ! वीर! आदिपुरुष ! श्रीकृष्ण ! गोपीपते ! ।
आर्तत्राण ! कृतज्ञ ! गोकुलपते ! नागेन्द्रपाशान्तक !
दीनोद्धारक ! प्राणनाथ ! पतितं मां पाहि सर्वेश्वर ! ॥ १२॥

हे नारायण ! नारसिंह ! नर ! हे लीलापते ! भूपते !
पूर्णाचिन्त्यविचित्रशक्तिक विभो ! श्रीश! क्षमासागर ! ।
आनन्दामृतवारिधे ! वरद ! हे वात्सल्यरत्नाकर !
त्वामाश्रित्य न कोऽपि याति जठरं तन्मां भवात्तारय ॥ १३॥

माता पिता गुरुरपीश ! हितोपदेष्टा
विद्याधनं स्वजनवन्धुरसुप्रियो मे ।
धाता सखा पतिरशेषगतिस्त्वमेव

नान्यं स्मरामि तवपादसरोरुहाद्वै ॥ १४॥

अहो दयालो ! स्वदयावशेन वै
प्रपश्य मां प्रापय पादसेवने ।
यया पुनर्मे विषयेषु माधव !
रतिर्न भूयाद्धि तथैव साधय ॥ १५॥

श्रीमत्सर्वेश्वरस्यैतत्स्तोत्रं पापप्रणाशनम् ।
एतेन तुष्यतां श्रीमद्राधिकाप्राणवल्लभः ॥ १६॥

इति श्रीमन्निम्बार्कपादपीठाधिरूढश्री निम्बार्कशरणदेवाचार्यविरचिता
श्रीसर्वेश्वरप्रपत्तिस्तोत्रं सम्पूर्णम् ।

Proofread by Mohan Chettoor

*Shri Sarveshvara Prapatti Stotram*
pdf was typeset on January 7, 2023

Please send corrections to *sanskrit@cheerful.com*